# Svadhinata Svatantryam

# स्वाधीनता स्वातन्त्र्यम्

## Document Information

Text title : Svadhinata Svatantryam

File name : svAdhInatAsvAtantryam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# स्वाधीनता स्वातन्त्र्यम्

(गीतिका) (भुजङ्गप्रयातम्)
स्वतन्त्राप्तिरेषा सदा सौख्य-दात्री
भयानां प्रहर्त्री गुणानां प्रदात्री ।
त्वमेवासि लोके सदा मानदात्री
सदा कीर्तिदात्री सदा मोददात्री ॥ स्व० ॥

न त्वत्तः परं मानदं लोकमध्ये
न त्वत्तः परं सौख्यदं किञ्चिदस्ति ।
त्वमेवासि लोकस्य चैतन्य दात्री
सदा प्रेरणाभू सदा शक्ति-स्रोतः ॥ स्व० ॥

विना त्वां जनाः शक्ति-कीर्त्यादि हीना
सुबुद्धविहीना सदा मान हीना ।
नराः पामरास्ते क्षुधा दैन्य-त्रस्ता,
अविद्याऽन्ध-ग्रस्ता सदा शोक ध्वस्ता ॥ स्व० ॥

विना त्वां नृणां जीवनं मोघमेव
विना त्वां गतिः सर्वदा दुःखदैव ।
विना त्वां शिरस्थः सदा मृत्युरेव
विना त्वां विकासो न हर्षाप्तिरेव ॥ स्व० ॥

न यत्रास्ति ते दीधिति  सौख्यमूला
न यत्रास्ति ते श्री सदा कीर्तिशीला ।
न राष्ट्रं न देशं प्रदेशो विशेषो
विना त्वाश्रितं कीर्तिमिष्टा श्रिया वा ॥ स्व० ॥

त्वमेवासि सौख्यस्य मूलं समन्तात्
त्वमेवासि कीर्त्यादिमूलं पुरस्तात् ।
त्वमेवासि मानस्य शक्तेश्च हेतुः

त्वमेवासि शस्त्रं त्वमेवासि हेति ॥ स्व० ॥

त्वदीये पदाब्जे मुदा देशभक्ताः ।
बलिं दत्तवन्तौ मुदं प्राप्तवन्तः ।
त्वदर्चापरा ये नरा मातृ भक्ता
सदा स्यास्तु तेषां यशो राजतेऽत्र ॥ स्व० ॥

त्वमेवासि शक्तिः, त्वमेवानुरक्ति
त्वमेवासि सिद्धिः, त्वमेवासि, ऋद्धिः ।
त्वमेवासि मन्त्रः, त्वमेवासि तन्त्रः,
त्वमेवासि शान्तिः, त्वमेवासि क्रान्तिः ॥ स्व० ॥

त्वमेवासि दुर्गा, त्वमेवासि लक्ष्म्या,
अधृष्या त्वमेवामसि दुर्धषरूपा ।
सदा स्नेह-स्त्रोतः, सदा शक्तिस्त्रोतः
त्वदीया कृपा याचते सर्वलोक ॥ स्व० ॥

सदा भारते ते कृपा सन्तता स्यात्,
त्वदचर्चापरा भारतीयाः भवेयुः ।
विहाय स्वयं स्वार्थजातं जघन्य
मुदा जीयनं तेऽर्पयेयुः पदाब्जे ॥ स्व० ॥

Proofread by Mandar Mali

*Svadhinata Svatantryam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*